## नित्यं हस्ते पाणावुपयमने। (७७/७७८)

[1]कृञि इति वर्तते। हस्ते पाणौ इत्येतौ शब्दौ कृञि नित्यं गतिसञ्ज्ञौ भवतः उपयमने। उपयमनं दारकर्म[2]। हस्तेकृत्य। पाणौकृत्य। दारकर्म कृत्वा इत्यर्थः। उपयमने इति किम्? हस्ते कृत्वा कार्षापणं गतः॥

## प्राध्वं बन्धने। (७८/७७९)

कृञि इति वर्तते। प्राध्वम् इति मकारान्तमव्ययमानुकूल्ये वर्तते। तदानुकूल्यं बन्धनहेतुकं यदा भवति तदा प्राध्वंशब्दः कृञि नित्यं गतिसञ्ज्ञो भवति। प्राध्वंकृत्य[3]। बन्धने इति किम्? प्राध्वं कृत्वा शकटं गतः॥

## जीविकोपनिषदावौपम्ये। (७९/७८०)

कृञि इति वर्तते। जीविका उपनिषद् इत्येतौ शब्दौ औपम्ये [4]विषये कृञि[5] गतिसञ्ज्ञौ भवतः। जीविका-कृत्य। उपनिषत्कृत्य। औपम्ये इति किम्? जीविकां कृत्वा गतः॥

## ते प्राग्धातोः। (८०/२२३०)

ते गत्युपसर्गसञ्ज्ञका धातोः [6]प्राक् प्रयोक्तव्याः। [7]तथा चैवोदाहृताः। तेग्रहणमुपसर्गार्थम्। गतयो ह्यनन्तराः॥

## छन्दसि परेऽपि। (८१/३३९१)

प्राक् [8]प्रयोगे प्राप्ते छन्दसि परेऽपि अभ्यनुज्ञायन्ते। छन्दसि विषये गत्युपसर्गसञ्ज्ञकाः परेऽपि पूर्वेऽपि प्रयोक्तव्याः। न च [9]परेषां प्रयुज्यमानानां सञ्ज्ञाकार्यं किञ्चिदस्ति। केवलं परप्रयोगेऽपि [10]क्रियायोग एषामस्ति इति ज्ञाप्यते। याति नि हस्तिना, [11]नियाति हस्तिना। हन्ति नि मुष्टिना, [12]निहन्ति मुष्टिना॥

## व्यवहिताश्च। (८२/३३९२)

व्यवहिताश्च गत्युपसर्गसञ्ज्ञकाः छन्दसि[13] दृश्यन्ते। 'आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः (ऋ. ३.४५.१)। आ याहि (ऋ. ६.१६.१०)॥

## कर्मप्रवचनीयाः। (८३/५४६)

कर्मप्रवचनीयाः इत्यधिकारो वेदितव्यः। यानित ऊर्ध्वमनुक्रमिष्यामः कर्मप्रवचनीयसञ्ज्ञास्ते वेदितव्याः। 'अधिरीश्वरे' (१.४.९७/६४४) इति यावद् वक्ष्यति। [15]कर्मप्रवचनीयप्रदेशाः—'कर्मप्रवचनीययुक्ते द्वितीया' (२.३.८/५४८) इत्येवमादयः॥

---

1. कृञि–उपयमने नास्ति ब. 2. पाणिग्रहणमित्यर्थः इत्यधिकम् अ.ह. 3. प्राध्वं कृतम् यत्प्राध्वंकरोति इत्यधिकम् क. फ. ह. 4. अर्थे फ, औपम्यविषये ह. 5. नित्यं इत्यधिकम् क. ड. फ. ह. 6. पूर्वं क. ग. 7. तथा चैवोदाहृतम् ह. 8. योगे ब. 9. परेण तेषाम् क, परेषां तेषां ड. 10. विक्रियायोगः ह. 11. नियाति हस्तिनी ड. 12. हन्ति मुष्टिकता ह. 13. विषये इत्यधिकम् फ. 14. याति मयूरेति ह. 15. वाक्यमिदं नास्ति फ.